व्युत्पत्तिवादः

१३५२

२१६

व्यु०वा०

१

श्रीगणेशाय नमः ॥ शाब्दबोधे चैकपदार्थेऽपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते। स च क्वचिद् भेदः क्वचि
त्तदतिरिक्त एवाधाराधेयप्रतियोग्यनुयोगिविषयविषयिभावादिः। तत्र भेदश्च प्रातिपदिकार्थे स्वसमानविभक्तिके
न स्वाव्यवहितपूर्ववर्त्तिना च पदेनोपस्थापितस्यैव संसर्गमर्यादया भासते। यथा घटो नीलः नीलघटमानयेत्यादौ घट
नीलयोः। ननु विरुद्धविभक्तिसत्त्वे पदार्थस्य नीलस्य घट इत्यादौ नीलघटाभेदान्वयबोधस्य सर्वानुभवविरुद्धत्वात्
स्वसमानविभक्तिकत्वं च स्वप्रकृतिकविभक्तिसजातीयविभक्तिकत्वं। साजात्यं च विभक्तिविभाजकप्रथमात्वादिना न तु
समानानुपूर्वीकत्वं तेन प्रमाणं ज्ञातं ब्राह्मणेन इत्यादावन्वयबोधानुपपत्तेः न तु विंशत्याद्याः सदैकत्वे इत्यनुशासनात् प्र
तं ब्राह्मणेन इत्यादेः साधुत्वेऽपि वेदाः प्रमाणमित्यादयोः कथं प्रयोगः। विशेष्यविशेषणवाचकपदयोरसति विशेषानुशासने
समानवचनत्वनियमात्। अन्यथा घटा नील इत्यादेरपि साधुताप्रसंगात्। समानलिंगकत्वे तथा नियमोपगमो वेदाः प्रमा

राम

१

णमित्यादेः साधुत्वोपपादने विद्यतिहेतुस्तदुक्तं वेदंतिकारिकायामिति त्रयः समुदिता हेतुरिति काव्यप्रकाशव्याख्या
याञ्च संगतिर्दुर्वारैवमसमानलिंगकस्थले विशेष्यवाचकपदस्य समानवचनस्यापि विशेषणपदस्य साधुत्वेता
दृशस्थले औत्सर्गिकमेकवचनमेव सर्वत्र विशेषणपदानंतरं प्रयोक्तुमुचितमिति। प्रत्यक्षानुमानोपमानशब्दाः प्र
माणानि पितरो देवताः इत्यादेरनुपपत्तिः। मैवं यत्र विशेष्यवाचकपदोत्तरविभक्तितात्पर्यविषयसंख्याविरुद्धसं
संख्यायाः अविवक्षितत्वं तत्र विशेष्यविशेषणपदयोः समानवचनत्वनियमः। अत एव पुरूरवोमाद्रवसौ विश्वेदे
वाः इत्यादौ द्वित्वविशिष्टयोः पुरूरवोमाद्रवसोः प्रशस्त्यो विशेषणतयाविवक्षितत्वान्न वाचकपदस्य द्विवचनांतता वे
दाः प्रमाणमित्यत्र च विशेषणपदोत्तरविभक्त्यावरुद्धत्वविरुद्धमेकत्वं विवक्षितं तच्च प्रकृत्यर्थतावच्छेदके प्रमितिक
रणत्वेऽन्वेति। शब्दप्रमाकरणत्वं च शब्दत्वावच्छिन्नमावच्छिन्निष्ठमेकमेवेति नायोग्यता। नच पदार्थः पदार्थेना

न्वेतीति व्युत्पत्तिविरोधः। संपन्नो व्रीहिरित्यादावेकव्रीहितात्पर्यकेप्येकवचनदर्शनेन तादृशव्युत्पत्तिसंकोचस्या
वश्यकत्वात्। यद्वा तत्र स्वाश्रयप्रकृत्यर्थतावच्छेदकत्वसंबंधेन प्रकृत्यर्थ एवैकत्वान्वयः। व्रीहित्वजातेः स्वरू
पत एव व्रीह्यादिपदशक्यतावच्छेदकतया न्वयितावच्छेदकरूपेणानुपस्थितेः। तत्र पदार्थांतरस्य चान्वयानुपप
त्तेरिति मन्यते। तदप्रकृतेपीदृशैव गतिः। यत्तु संपन्नो व्रीहिरित्यादावेकवचनोपस्थितानि नानैकत्वानि प्रत्येकं नाना
व्रीहिष्वन्वीयंते इत्युक्तैव सामंजस्ये जाते। ऐकत्वभानोपगमो निरर्थक इति तदसत्। यतः स्वसजातीयनिष्ठभेदप्रति
योगितानवच्छेदकैकत्वरूपसजातीयद्वितीयरहितत्वमेकवचनार्थः। न त्वेकत्वमात्रं तस्य वस्तुमात्रसाधारण्ये
ऽर्थत एव लाभात् अनुपयोगाच्च। अत एव [illegible] पशुना यजेतेत्यादौ पशुनिष्ठतादृशैकत्वस्य विवक्षितत्वात् अनेक
पशुकरणकयागान्नादृष्टसिद्धिः। साजात्यं चस्य समभिव्याहृतपदार्थसंसर्गित्वविशिष्टप्रकृत्यर्थतावच्छेदकरू

पि एवं अतोऽत्र घटोऽस्तीत्यादौ घटनिष्ठभेदप्रतियोगितानवच्छेदकैकत्वाप्रसिद्धावपि न क्षतिः। एतद्देशाविद्यमा
नघटनिष्ठभेदप्रतियोगितानवच्छेदकैकत्वस्यैवात्र बोध्यादिति तस्य च प्रसिद्धत्वात्। एतद्देशे बहुघटसत्त्व
दशायां तादृशवाक्यप्रयोगस्तु जात्येकत्वादेव समर्थनीयः। यत्तु कैश्चित्त्वाविवयोक्षामपि भावाख्यातस्थले
एकवचनस्य साधुत्वदर्शनात्। संख्यायाः अविवक्षेऽपि संपन्नो व्रीहिरित्यादौ एकवचनोपपत्तेरत्वं जात्ये
कत्वपरतैतयाऽत्र समर्थने नेति। तदप्यकिंचित्करं। भावाख्यातस्थलेऽगत्यं तत्र हेतुविभक्तेर्निरर्थकत्वोपगम रविर
मात्। अत एव सार्थकत्वोपगमसंभवे तत्त्वमित्यागमस्यानुचितत्वात्। सन्नितात्पर्ये तद्धोघस्यानुभविकत्वा

व्यु॰वा॰
२

त्य१

चेति। एवं त्रयः समुदिता हेतुरित्यत्र हेतुपदं कार्योत्पादप्रयोजकतावच्छेदकसमुदायत्वावच्छिन्नपरं। तादृशस
मुदायत्वान्वितमेकत्वमेकवचनार्थः। अत एव शक्त्यादीनां त्रयाणां तृणारणिमणिन्यायेन हेतुत्वशं
कानिरासः। तथा सत्येषामेकैकसमवधानदशायामपि कार्योत्पत्तेरावश्यकतयाऽन्वितपर्याप्तसमुदा त३
यत्वस्य कार्योत्पत्तिप्रयोजकतानवच्छेदकतया तेषां त्रयाणां तथाविधैकसमुदायत्वाश्रयत्वानुपपत्तिः।
एवं जात्याकृतिव्यक्तयः पदार्थ इत्यत्र त्रितयनिष्ठस्य पदशक्तिरूपपदार्थत्वस्यैकत्वं विवक्षितमिति
तत्र विशेष्यपदस्य बहुवचनांतत्वेपि विशेषणपदस्यैकवचनांततोपपत्तिः प्रत्यक्षानुमानेत्यादिसू
त्रे प्रमाकरणत्वरूपप्रकृत्यर्थतावच्छेदकस्य प्रत्यक्षानुमानादिनिष्ठस्यैकतया वाधितत्वेन प्रमाण राम

३

पदस्य बहुवचनांततेति। एवं पितरो देवता इत्यत्रापि पितृपितामहादीनां सहितानामेकरूपेण देवतात्वविरहेण पितृत्वपितामहत्वादीनां पृथगेवयागोद्देश्यत्वरूपदेवतात्वात्। उद्देश्यतावच्छेदकभेदेनैवोद्देश्यताभेदात्। एकत्वस्याविवक्षणाद्देवतापदस्य बहुवचनांततेति दिक्। स्वप्रकृतिकत्वं च स्वाव्यवहितोत्तरत्वेनप्रतिसंधीयमानत्वं। तेन दधिसुंदरमित्यादौ विशेष्यपदानंतरं विभक्त्यसत्वेपि न क्षतिः। तत्र विभक्तेरनुसंधानं विना शाब्दबोधानभ्युपगमात्। एवं तादृशविभक्तिसजातीयविभक्तिकत्वमपि तथाविधविभक्त्यव्यवहितपूर्ववर्तितया प्रतिसंधीयमानत्वं। तेनेदं दधीत्यादौ विशेषणपदानंतरं विभक्तेरसत्वेपि न क्षतिः। अथ नीलस्य घट इत्यादावपि पदार्थेपि स्थित्यादिकारणसमवधानसंभवात्कथं न नीलस्

घटयोरभेदान्वयबोधइतिचेत्। तथाविधान्वयबोधोपयिकाकांक्षाविरहात्। तथाहि। तादृशान्वयबोधप्र

थमाविभक्त्यंतघटादिपदसमभिव्याहृतप्रथमांतनीलादिपदत्वमेवासमस्तनीलघटपदाद्याकांक्षा॥

समासस्थले च घटपदाद्यव्यवहितपूर्ववर्त्तिनीलपदत्वं नीलपदाव्यवहितोत्तरवर्त्तिघटादिपदत्वं

वाकांक्षा। उक्तस्थले च तादृश्या एकस्या अप्यभावांक्षाया विरहान्नापत्तिः। कार्यतावच्छेदककोटाव

व्यवहितोत्तरत्वानिवेशान्नोक्ताकांक्षाज्ञानयोः परस्परबोधे व्यभिचारः। यत्तु समासासाधारणं विशे व्यासऽ

षणपदस्य विशेष्यवाचकपदाप्रकृतिकविभक्त्यप्रकृतित्वस्वरूपं विरुद्धविभक्तिराहित्यमेव ता- राम

दृशान्वयबोधोपयिकाकांक्षा। विशेष्यवाचकपदनिष्ठविशेषणवाचकपदाप्रकृतिकविभक्त्यप्र ४

कृतिस्वरूपंविरुद्धविभक्तिराहित्यमेवतादृशान्वयबोधौपयिकाकांक्षाविशेष्यवाचकपदनिष्ठविशेषणपदवाचक
पदप्रकृतिकविभक्त्यप्रकृतित्वंचनतथा।नीलंघटमानयेत्यादावसंभवादिति।तदसत्।विशेष्यवाचकपदप्रकृ
तिकत्वस्यतादृशपदानुत्तरत्वस्यतदुत्तरत्वेनाज्ञातिसंबंधीयमानत्वरूपस्यवानीलोघटइत्यादौनीलादिपदसम
भिव्याहृतविभक्तेःघटपदसमभिव्याहृतविभक्तिभिन्नातयासत्वात्।अथविशेष्यवाचकपदोत्तरावृत्तिविभ
क्तिविभाजकधर्मवत्विभक्तिराहित्यस्यविवक्षणान्नदोषइतिचेत्तर्हिविभक्तित्वादिकमजानतःपुरुषस्यतादृश
धर्मज्ञानासंभवात्शाब्दबोधानुपपत्तिः।नीलोघटइत्यादावपिसुपदस्याम्पदत्वादिभ्रमदशायांतादृशबोधस्यानु
दयात्।नीलम्मघटइत्यादावपिम्बादेःसुत्वादिभ्रमदशायांशाब्दबोधोत्पत्त्यास्वरूपतोविभक्तिराहित्यस्याप्र

योजकत्वात्। अघनीलोघटः नीलघटः इत्यादिद्विविधबोधसाधारणं स्वोत्तरसुप्पदभिन्नपदानुत्तरत्वविशिष्ट
स्वोत्तरत्वादिरूपस्याव्यवहितोत्तरत्वसंबंधेन नीलादिपदवत्सुबंतघटादिपदत्वमेव तथात्वमिति चेन्न। नीलघ
टरूपमित्यादिवाक्यसाधारण्यानुरोधेनान्यादृशाकांक्षाया उपगंतव्यतया उपदर्शितव्याससमाससाधारणे
ननुगताकांक्षानुसरणस्याप्रयोजकत्वात्। अघनीलं घटमानयेत्यादौ नीलादेर्घटादावन्वयोपगमे नीलादि
पदोत्तरविभक्त्यर्थस्य कर्मत्वादेः कुत्रान्वय इति चेन्न कुत्रापि। विभक्तिपदं साधुत्वार्थमेव प्रयुज्यते। अभेद
एव विशेषणविभक्तेरर्थः अभेदस्य संसर्गतया भानं तु समासस्थल एव। तत्र विभक्त्यनुसंधानं विनापि शा
ब्दबुद्धेरनुभविकत्वादित्यपि वदंति। अथैतन्मते भेदो यदि भेदत्वावच्छिन्नाभावस्तदा प्रसिद्धिः यदि च भे

दप्रयोगिकाभावस्तदानीलंजलमित्यादिवाक्यस्याप्रामाण्यापत्तिः जलेह्रदत्वादिनानीलभेदाद्यभावसत्वात्।
नीलभेदत्वाद्यवच्छिन्नाभावस्यविभक्त्यर्थत्वेनीलादिपदार्थानन्वयप्रसंगः। नञ्भेदप्रतियोगिकाभावएवविभ
क्त्यर्थः नीलादिपदसमभिव्याहारान्नीलभेदत्वावच्छिन्नाभावःप्रतीयतेइतिवाच्यं।पदार्थद्वयसंसर्गभानस्यै
वाकांक्षानियम्यत्वात्। नीलभेदत्वावच्छिन्नप्रतियोगितांतर्भावेणवृत्तिंविनाभेदरूपपदार्थतावच्छेदक
स्याभावेतादृशसंबंधभानासंभवात्।मैवं।भेदोऽभावस्यविशेषणंविभक्तेरर्थः।विशिष्टंनामस्तुस्याकां
क्षादिवशात्। एतेनभेदेनीलादिपदार्थान्वयेएकदेशान्वयप्रसंगइत्यपिनिरस्तं।नञ्विशेषणविशेष्यत्वेर
भेदार्थकत्वेनीलंघटइत्यादावपिअभेदान्वयबोधापत्तिः।ध्यान्येनध्यानवानित्यादौतृतीययाअभेदबोध

व्यु॰वा॰
६
6

नात्। अभेदप्रकारकबोधे विरुद्धविभक्तिराहित्यानपेक्षणादिति वाच्यं। द्वितीयादिनाऽभेदबोधे द्वितीयाद्यन्तवि
शेष्यवाचकपदसमभिव्याहारस्य प्रयोजकत्वाभ्युपगमात्। अथ प्रमेयो घट इत्यादौ प्रमेयत्वावच्छिन्नभेदाप्रसि
द्धा न्यूनधर्मसमनियतगुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वे कंबुग्रीवादिमान् घट इत्यादावपि कं
बुग्रीवादिमत्त्वावच्छिन्नभेदाप्रसिद्ध्या विशेषणविभक्तेरभेदार्थकत्वासंभवः एवं नीलघटादिपदस्य नी
लादिघटितस्य नीलो घट इत्यादिवाक्यस्यापि प्रामाण्यापत्तिः। नीलत्वादिना पटभेदाभावस्य नीलघटादौ
सत्त्वात्। एतेन विशेषणतावच्छेदकीभूतनीलत्वप्रमेयत्वादिकमेव विशेषणविभक्तेरर्थः नीलत्वादे
नीलत्वाद्यवच्छिन्नभेदाभावरूपतया अभेदार्थकत्वप्रवादोपपत्तिरिति परास्तं। नीलत्वादेर्नीलत्वादिम राम ६

तः स्ववृत्तित्वसंबंधेनान्वयेऽआकांक्षाविरहात् यथाहि तद्विशिष्टेऽधिकरणतया तदन्वयोऽनुभववि
रुद्धस्तथा तद्धर्मेऽप्याधेयतया तद्धर्मवदन्वयोपि। अतएव वनकर्मगच्छतीत्यादिवाक्यस्य निराकांक्षता नचैवं
संसर्गतामतेप्यनिस्तारः नीलोघट इत्यादौ स्ववृत्तिनीलत्वादेः संसर्गतास्वीकारेऽत्र कस्तु लेत्याप्रामाण्यापत्ते
र्दुर्वारत्वादिति वाच्यं स्ववृत्तिनीलत्वादेः स्वस्मिन्नेव संबंधतोपगमेन पटादिवृत्तिनीलत्वादेर्घटादौ घटादिसं
बंधताविरहेण तादृशापत्तिप्रसंगाभावात् वस्तुतस्तु तत्तद्व्यक्तित्वावच्छिन्नभेदाभाव एव नीलत्वादिप्रकारेण
भासमानानां तत्तद्व्यक्तीनां स्वस्मिन्संबंधतया भासत इति न काप्यनुपपत्तिः। संबंधतावतस्य भेदप्रतियो
गिकाभावत्वेन तत्तद्व्यक्तिभेदप्रतियोगिकाभावत्वेन वेत्यन्यदेतत्। न चैवं विशेषणविभक्तेरभेदार्थकत्वम

तेपि तत्तद्व्यक्तित्वावच्छिन्नाभेद एव विभक्त्यर्थो वक्तव्य इति वाच्यं तथा सत्यपूर्वव्यक्तिनिष्ठतत्तद्व्यक्तिकस्य कथंचि
दपि भानासंभवेन तदवच्छिन्नभेदाभावे शक्तिग्रहासंभवेनापूर्वव्यक्तौ नामभेदान्वयबोधानुपपत्तेः। संसर्गता
नस्य विशिष्टबुद्धावहेतुत्वेनानुपस्थितस्यापि संसर्गतता मतेऽनुपपत्त्यभावात्। न च विभक्त्यर्थेपि भेदे तत्तद्व्यक्तित्वाव
च्छिन्नप्रतियोगिताकत्वसंबंधेनैव नीलत्वादिनात तद्व्यक्तौ नामन्वयः तादृशभेदे नामपि तत्तद्व्यक्तिभेदत्वावच्छिन्नप्र
तियोगिताकत्वसंबंधेनाभावेऽन्वय उपपद्यते। तावतैव तद्व्यक्तित्वावच्छिन्नाभेदस्याभ इति न काप्यनुपपत्तिरिति वाच्यं।
विशेषणतावच्छेदकावच्छिन्नाया एवाभावे प्रतियोगितायाः संबंधतया भानात् अन्यथा विशिष्टवैशिष्ट्यबोधत्वानुपपत्तेः। प्रति
योगिविशेषिताभावभानं तु विशिष्टवैशिष्ट्यबोध्यमर्यादां नातिशेते इति दर्शनात् केवलं द्वितीयेऽप्येव विशेषणमिति दिशात्या न कश्चि
दप्युपेतीति वेसत्यां अभेदस्तादात्म्यं तच्च स्वव्यक्त्यसाधारणो धर्मः असाधारण्यं नैकमात्रवृत्तित्वं तच्च स्वसामानाधिकर

एवं स्वप्रतियोगिवृत्तित्वोभयसंबंधेन भेदविशिष्टं यत्तदन्यत्वं इत्येकमात्रवृत्तिधर्मरूपविशेषणविभक्त्यर्थः। वृत्तिश्च
तत्र प्रकृत्यर्थस्य संसर्गमर्यादया भासते तादृशस्वधर्मत्वघटितत्वादिरूपेण वा। अपूर्वव्यक्तिनिष्ठस्य तादृशधर्मस्य विशि
ष्यतानुगमश्च घटत्वेप्येकमात्रवृत्तिधर्मत्वादिना सामान्यप्रत्यासत्त्यानुग्रहत्वमेव। अभेदस्य संसर्गतामतेपि तादृशानु
गताभेदस्यैव तथात्वं तु विततनघटितत्वावच्छिन्नभेदाभावकूटस्य विशिष्यतयात्वे घटो न नील इत्यादिवाक्यजन्यबोधे प्र
तियोग्यभावान्वयोऽनुपयोगश्चेमाविति न्यायेन तादृशानुनुगतसंबंधावच्छिन्नप्रतियोगिताकाननुगताभाव एव भासेरन्न तु
नीलादिभेदवृत्तिरेकोऽभावः तथा सति यत्किंचित्तादृशाभावतात्पर्येण प्रयुक्तस्य नीलेपि न नील इति वाक्यस्य प्रामाण्यं स्यात् तादृ
दृं तु बोध्यं विशेषणविभक्तेरभेदार्थकत्वे घटो न नील इत्यादेन भा नीलाद्यभेदाभाव एव प्रत्याय्येत न तु नीलादिभेदः यादृशस
मभिव्याहारस्थले येन संबंधेन यत्र धर्मिणि येन रूपेण तद्वत्त्वं न भासत्वे प्रतीयते तादृशस्थले न भात तत्र धर्मिणि तादृशधर्मा

व्यु॰वा॰
८
४

वच्छिन्नप्रतियोगिताकाभावबोधस्यव्युत्पत्तिसिद्धत्वात्। प्रतियोग्यभावान्वयावित्यादेरप्ययमेवार्थः। एवं च नञो भेदबोधक-
त्वं कुत्रापि न संभवति। अनीलं घटमानयेत्यादौ घटपटसामानाधिकरण्यानुरोधेनानीलपदस्य नीलभिन्नपरतया
नञो भेदवत्येव लक्षणया तात्पर्यगतत्वात्। इदं तु तत्त्वं। असमासस्थलेऽभेदस्य संसर्गतोपगमेपि गौरवविरहात्तत्र
विशेषणविभक्तेरिति कल्पनमनुचितं। न वा भेदप्रत्वविभक्तिः शक्तिभ्रमः स्वारसिकलक्षणाग्रहो वा तत्र सर्वमतएवा
भेदप्रकारकबोधस्य नीलो घट इत्यादिवाक्यादुत्पत्त्या तादृशसमभिव्याहारज्ञानस्य हि विधबोधे हेतुताद्वयं कल्पनी-
यमभेदस्य संसर्गतावादिनेति गौरवं। एवं तादृशसमभिव्याहारज्ञानाघटितसामग्र्याः भिन्नाभिन्नयोग्यताज्ञानघटि-
ततया द्विविधेन भिन्नविषयकप्रत्यक्षादिकं प्रति तादृशघाटसामग्रीप्रतिबंधकत्वाधिकमितिवाच्यं। अभेदस्य संस-
र्गतावादिनो तत्स्थलेऽपि तत्संसर्गकबोधस्यैवोपगमादिति दिक्। स्तोकं पचतीति मृदु पचतीत्यादौ विरुद्धपदोपस्थापितस्या राम
८

पिस्तोकंनरूपदे धात्वर्थपाकादावभेदान्वयोव्युत्पत्तिसिद्धः।तदनुरोधेनद्वितीयांतपदधात्वर्थपदसमभिव्याहारस्यापिअभेदान्व
यबोधौपयिकाकांक्षात्वमुपगम्यते।क्रियासमभिव्याहारस्थलेवेनद्वितीयातिरिक्तविभक्तिरूपघटेक्रियाविशेषणानांकर्मत्व
मित्यनुशासनेनतत्कर्मत्वातिदेशात्।नचैवंस्तोकंपाकइत्यादावपिद्वितीयाप्रसंगः।तत्रापिस्तोकादेःक्रियायामेवविशेषणत्वात्।
भावकृतांप्रयोगसाधुत्वमात्रार्थकतयाधात्वर्थैवतत्रपाकादिप्रतिपादनादितिवाच्यं।क्रियापदस्यतत्तत्स्वार्थकप्रत्ययांतधातुपरत्वा
द्याद्यर्थपरत्वात्।स्तोकंस्थीयतेइत्यादावाख्यातस्यापिवर्तमानत्वार्थकतयासार्थकत्वात्।नचवर्तमानत्वाद्यविवक्षायांद्वितीयानुप
पत्तिरितिवाच्यं।वर्तमानत्वादिविवक्षास्थलेनद्यर्थबोधप्रयोजककांक्षाशालित्वेनैवतदविवक्षास्थलेपिभावाख्यातस्यार्थवत्वात्।केचि
तु।धातोरिवप्रत्ययांतस्यापिपाकादेःशक्तिरूपेतेऽन्यथासुब्विभक्त्यर्थसंख्याकर्मत्वादानांतत्रपाकादावन्वयानुपपत्तेः।प्रकृत्यर्थान्वितस्वा
र्थबोधकत्वंप्रत्ययानामितिव्युत्पत्तेः।धातोर्नामसुब्विभक्त्यप्रकृतित्वात्।प्रकृत्येकदेशार्थेपिप्रत्ययार्थान्वयोपगमेपचंतंपश्यतीत्यादि

सु॰ वा॰
९

तःपचमानंपश्यतीत्यादितस्तुपाकादौद्वितीयार्थकर्मत्वान्वयप्रसंगात् एकविशेषणत्वेनान्वितस्यान्यत्रविशेषणत्वेनान्वयस्या
व्युत्पन्नत्वेनतत्रप्रत्ययार्थविशेषणपाकादेर्नकर्मत्वेविशेषणतयाऽन्वयइतिचेत् नतथापिपाकादिविशेषणतयासुबर्थसंख्यान्वय
संभवात् यत्रपाककर्त्रादेर्द्वित्वादिकंबाधितंपाकादेश्चतदबाधितंतत्रपचंतौपश्यतिपचमानौपश्यतीत्यादिप्रयोगप्रसंगात् धात्व
पस्थाप्यार्थेसुबर्थान्वयबोधंप्रतितत्तद्धातूत्तरप्रत्ययधर्मिकंकिंचिदर्थपरत्वज्ञानस्यप्रतिबंधकतामुपगम्यैतादृशातिप्रसंगवारणे
चगौरवात् एवंशोभनंपचनमित्यादौधात्वनुमात्रेणपाकाद्युपस्थितौशोभनाद्यभेदान्वयबोधानुपपत्तिः।विशेषणविभक्तिसजातीय
विभक्तिप्रकृत्यनुपस्थाप्यत्वात् प्रकृत्येकदेशसाधारणतादृशविभक्तिप्रकृतित्वस्यप्रयोजकत्वेतत्रसुइत्यादेरधिकरणपरत्वेपितथा
विधान्वयबोधापत्तेः।कस्यचित्प्रतिबंधकतांकल्पयितावतद्वारणेवगौरवात्। नचैवमुपकुंभार्द्धपिप्पल्यादिरूपपूर्वपदार्थप्रधानस राम
मासपदात्कुंभसमीपपिप्पल्यर्द्धादौविभक्त्यर्थान्वयस्यप्रातिपदिकार्थान्तराभेदान्वयस्यवानुपपत्तिः।पूर्वपदस्यसमासोत्तरविभक्त्या ९